योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ४१

एकचत्वारिंशः सर्गः ४१

श्रीराम उवाच ।

क्षीरोदकुक्षितुल्याभिः शीतलामलदीप्तिभिः ।

तवोक्तिभिर्विचित्राभिर्गम्भीराभिरिवाभितः ।। १

क्षणमान्ध्यमिवाप्नोमि क्षणं यामि प्रकाशताम् ।

शान्तातपलवः प्रावृड्लोलाभ्र इव वासरः ।। २

अनन्तस्याप्रमेयस्य सर्वस्यैकस्य भास्वतः ।

अनस्तमितसारस्य कलना कथमागता ।। ३

श्रीवसिष्ठ उवाच ।

यथाभूतार्थवाक्यार्थाः सर्वा एव ममोक्तयः ।

नासमर्था विरूपार्थाः पूर्वापरविरोधदाः ।। ४

ज्ञानदृष्टौ प्रसन्नायां प्रबोधे विततोदये ।

यथावज्ज्ञास्यसि स्वस्थो मद्वाग्दृष्टिबलाबलम् ।। ५

उपदेश्योपदेशार्थं शास्त्रार्थप्रतिपत्तये ।

शब्दार्थवाक्यरचनाभ्रमो मा तन्मयो भव ।। ६

यदा पुरा ज्ञास्यसि तत्सत्यमत्यन्तनिर्मलम्।

वाच्यवाचकशब्दार्थभेदं त्यक्ष्यसि वै तदा ।। ७

भेदकृद्वाक्प्रपञ्चोऽयमुपदेश्येषु कल्पितः ।

उपदेश्योपदेशार्थं शास्त्रार्थप्रतिपत्तये ।। ८

शब्दार्थवाक्प्रपञ्चोऽयमुपदेशेषु कल्पितः ।

सदाऽज्ञेषु न तज्ज्ञेषु विद्यते पारमार्थिकः ।। ९

कलनामलमोहादि किंचिन्नात्मनि विद्यते ।

नीरागं ब्रह्म परमं तदेवेदं जगत्स्थितम् ।। १०

एतद्विचित्ररूपाभिर्युक्तिभिर्बहुशः पुनः ।

विस्तरेणैव वक्तव्यं सिद्धान्तावसरेऽनघ ।। ११

वाक्प्रपञ्चं विना त्वेतदज्ञानमतुलं तमः ।

भेत्तुमन्योन्यमुदितं यत्नं कर्तुं न शक्यते ।। १२

अविद्ययैवोत्तमया स्वात्मनाशोद्यमेच्छया ।

विद्या सा प्रार्थ्यते राम सर्वदोषापहारिणी ।। १३

शाम्यति ह्यस्त्रमस्त्रेण मलेन क्षाल्यते मलः ।

शमं विषं विषेणैति रिपुणा हन्यते रिपुः ।। १४

ईदृशी राम मायेयं यां स्वनाशेन हर्षदा ।

न लक्ष्यते स्वभावोऽस्याः प्रेक्ष्यमाणैव नश्यति ।। १५

विवेकमाच्छादयति जगन्ति जनयत्यलम् ।

नच विज्ञायते कैषा पश्याश्चर्यमिदं जगत् ।। १६

अप्रेक्ष्यमाणा स्फुरति प्रेक्षिता सु विनश्यति ।

मायेयमपरिज्ञायमानरूपैव वल्गति ।। १७

अहो नु खलु चित्रेयं माया संसारबन्धनी ।

असत्येवातिसत्येव स्वज्ञानं विहितं तया ।। १८

अत्यभिन्नपदे तस्मिंस्तन्वाना भेदमाततम् ।

संसारमाया येनासौ तेनासौ पुरुषोत्तमः ।। १९

नास्त्येषा परमार्थे न त्वेवं भावनयेद्धया ।

ज्ञो भूत्वा ज्ञेयसंप्राप्तो ज्ञास्यस्यस्यास्त्वमाशयम् ।। २०

यावत्तु न प्रबुद्धस्त्वं तावन्मद्वचसैव ते ।

निश्चयो भवतूद्दामो नास्त्यविद्येति निश्चलः ।। २१

यदिदं दृश्यतां यातं मानसं मननं महत् ।

असन्मात्रमिदं यस्मान्मनोमात्रविजृम्भितम् ।। २२

सत्तद्ब्रह्मेति यस्यान्तर्निश्चयः सोऽपि मोक्षभाक् ।

चलाचलाकृतिर्या या दृष्टिरावद्धभावना ।। २३

सा समग्रजगद्भूतखगबन्धनवागुरा ।

यः स्वप्नभूमिवद्भ्रान्तमसत्सद्ब्रह्मैकनिश्चयः ।। २४

जगत्पश्यत्यसक्तात्मा न स दुःखे निमज्जति ।

यस्यैतास्वस्वरूपासु भावना स्वात्मभावना ।। २५

अस्वरूपस्य तस्यापि सा ह्यविद्यैव विद्यते ।

विकारितादयो दोषा न केचन महात्मनि ।। २६

परमात्मनि विद्यन्ते पयसीवेह पांसवः ।

भावनाशब्दशब्दार्थरञ्जनेयं जगद्गता ।। २७

व्यवहारार्थमुत्पन्ना व्यतिरिक्ता च नात्मनः ।

अनेन व्यवहारेण विनैताः शास्त्रदृष्टयः ।। २८

संस्थितिं नाधिगच्छन्ति पटा इव वितन्तवः ।

उह्यमानो ह्यविद्यायामात्मा नेहोपलक्ष्यते ।। २९

आत्मज्ञानादृते तच्च शास्त्रार्थात्समवाप्यते ।

अविद्यासरितः पारमात्मलाभादृते किल ।। ३०

राम नासाद्यते तद्धि पदमक्षयमुच्यते ।

यतःकुतश्चिज्जातेयमविद्या मलदायिनी ।। ३१

नूनं स्थितिमुपायाता समासाद्य पदं स्थिता ।

कुतो जातेयमिति ते राम मास्तु विचारणा ।। ३२

इमां कथमहं हन्मीत्येषा तेऽस्तु विचारणा ।

अस्तं गतायां क्षीणायामस्यां ज्ञास्यसि राघव ।। ३३

यत एषा यथा चैषा यथा नष्टेत्यखण्डितम् ।

वस्तुतः किल नास्त्येषा विभात्येषा न वेक्षिता ।। ३४

असतो भ्रान्तता सत्यरूपां जानातु कः कुतः ।

जातेयं प्रौढिमापन्ना दोषायैवातताकृतिः ।। ३५

बलात्प्रणाशय त्वेनां परिज्ञास्यसि वै ततः ।

अपि शूरा अतिप्राज्ञास्ते न सन्ति जगत्त्रये ।। ३६

अविद्यया ये पुरुषा न नाम विवशीकृताः ।

तदस्या रोगशीलाया यत्नं कुरु विनाशने ।। ३७

यथैषा जन्मदुःखेषु न भूयस्त्वां नियोक्ष्यति ।

सर्वापदामेकसखीमज्ञानतरुमञ्जरीम् ।

अनर्थसार्थजननीमविद्यामलमुद्धर ।। ३८

भयविषाददुराधिविपत्प्रदां

हृदयमोहमहापटलांकुराम् ।

भृशमपास्य कुदृष्टिमिमां बला-

द्भव भवार्णवपारमुपागतः ।। ३९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषु स्थितिप्रकरणे अविद्याकथनं नामैकचत्वारिशः सर्गः ।। ४१ ।।